**Kaumodaki : Journal of Multidisciplinary Studies**
[A Peer-Reviewed, Open Access Journal; Indexed in NepJoL]
ISSN : 2822 - 1567 (Print); ISSN : 2822 -1583 (Online)
Published by Research Management Cell, Shree Vinduwasini Sanskrit Vidyapeeth (Campus)
Nepal Sanskrit University, Pokhara, Nepal
https://ejournal.vsc.edu.np

# न्यायवैशेषिकदर्शनयोर्मोक्षतत्त्वविमर्शः

**केशवशरणोऽर्यालः**
Department of Nyāy Darśan (Ancient Logic), Balmeeki Vidyapeeth (Campus), Kathmandu, Nepal

***Article History :*** *Submitted 15 Sep. 2023; Reviewed 06 Oct. 2023; Accepted 19 Oct. 2023*
***Corresponding Author :*** *Keshavsharan Aryal,* ***Email :*** *keshavsharan81@gmail.com*
***DOI :*** *https://doi.org/10.3126/kdk.v4i1.64538*
*Copyright 2024 © the Author(s) and the Publisher*

**सारः**

*पौरस्त्यचिन्तनानि मोक्षे पर्यवसन्नानि भवन्ति । अखिलान्यपि चिन्तनानि मोक्षार्थमेव प्रवर्त्तमानानि सन्ति राराजन्ते । पौरस्त्यचिन्तनेषु तत्र तत्र मोक्षकारणे तत्स्वरूपे च भेदस्तु सहजोऽपेक्ष्यश्च । न्यायवैशेषिकयोश्चिन्तने मोक्षतत्त्वं किंस्वरूपकम्, किञ्च तस्य कारणम्, कथञ्च तल्लब्धिरित्यादिकं प्रस्तुतस्य लघुप्रबन्धस्य समस्यात्वेन दृग्गोचरीभवति । तत्समाधानायाऽऽवश्यकसामग्रीसङ्कलनार्थं भूयसा प्रमाणेन पुस्तकालयाः प्रयुक्ताः । अथ च न्यूनाधिकतयाऽन्तर्जालादिकमप्यवालम्ब्यत । यथाऽऽवश्यकमवयवतत्त्वज्ञैः सह संवादादिकमपि विधाय सामग्रीसङ्कलनं व्यधायि । तदनु सङ्कलितसामग्रीर्विश्लिष्य प्रस्तुतशोधलेखसज्जीकरणार्थं गुणात्मकानुकूलः समीक्षणात्मको विधिरवलम्बितः । मोक्षपदं मोक्षणमित्यर्थे घञि चौरादिकान्मोक्ष्धातुतो निष्पद्यते । मोक्षो नाम दुःखनिवृत्तिः । तत्र केचन चिन्तका मोक्षं दुःखस्याऽभावत्वेन प्रतिपादयन्ति चेत् केचन पुनः सुखरूपत्वेन । यद् वा तद्वा भवतु मोक्षे दुःखन्तु न केनाप्युरीक्रियते, अतस्समेषाञ्च चिन्तकानामैकमत्येन सर्वदुःखत आत्यन्तिकं मोचनमेव मोक्षः । वैदिकचिन्तने 'ऋते ज्ञानान्न मुक्तिः' इत्याभाणकस्याऽतिरोहितत्वात्तत्त्वज्ञानस्यैव मोक्षहेतुत्वं प्रतिपादितं भवति । प्रसङ्गेऽत्र न्यायशास्त्रे प्रमाणादिषोडशपदार्थानां तत्त्वज्ञाने सति मोक्ष इति स्पष्टीकृतं चेद् वैशेषिके च द्रव्यादिपदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानादिति । तत्र उभयत्रापि मोक्षे दुःखनिवृत्तिरिति स्वीक्रियते । तत्र दुःखपदेन एकविंशतिधं दुःखं गृह्यते । जागतिकं सुखमपि तत्रैवान्तर्भवति । यद्यपि न्यायवैशेषिकयोर्मोक्षे सुखस्यापि अभावः प्रतिपाद्यते । परं तत्तु संसारगतमादाय, वस्तुतस्तु पारमार्थिकं सुखन्तु तत्रापि स्वीकर्त्तव्यमेव । यच्च नैयायिकप्रवरेण भासर्वज्ञेनाथ च तदवलम्बिभिर्बहुधा बहुशः प्रतिपादितो लभ्यते । न्याये मोक्षस्य कारणत्वेन ज्ञानस्यैव प्रतिपादितत्वेऽपि वैशेषिके तु सूक्ष्मविचारे कृते सति मोक्षार्थं ज्ञानकर्म्मसमुच्चयवादः पुरःस्थाप्यत इत्येव निष्कृष्टिः ।*

**शब्दकुञ्जी :** अपवर्गः, ज्ञानकर्म्मसमुच्चयः, निरतिशयः, निःश्रेयसम्, न्यायः

## विषयपरिचयः

पौरस्त्यचिन्तनं तावद् वैदिकावैदिकभेदेन द्विधा विभज्यत इति तु नाविदितं विपश्चिदपश्चिमानाम् । तच्च पुनर्वस्तुतस्तु वैदिकी परम्पराऽथ च श्रामणी परम्परेति पदावल्यापि व्यवहर्त्तव्या । तत्र वैदिकी च वेदस्य निष्कण्टकं प्रामाण्यमुरीकृत्याऽऽस्ते, श्रामणी च पुनर्वेदस्य प्रामाण्यं तिरस्कृत्याऽऽत्मनिग्रहे तत्साक्षात्कारे च विशेषमहत्त्वं प्रतिपादिकेति । न्यायवैशेषिकयोश्चिन्तनं वैदिक्यामन्तर्भवति । पौरस्त्यचिन्तनेऽन्यापि एका परम्परा लभ्यते या च न

वैदिकी न वा श्रामणी, अथ च सामान्यतोऽवैदिकीत्यभिधातुं शक्यम्। सा चैहलौकिकसुखादिषु तत्कारणेष्वेव रमते, न तु पारलौकिकेष्वात्मपरमात्मस्वर्गादिषु विहरति। या च परम्पराऽऽजीवकचार्वाकादिचिन्तनपदेन व्यवह्रियते।

चिन्तनमात्रं सुखार्थं प्रवर्त्तत इति तु सर्वसिद्धम्। तत्र चार्वाकेतरपौरस्त्यचिन्तनन्त्वपवर्गाऽपरपर्यायनिरतिशयसुखार्थमेव। सर्वस्यापि चिन्तनस्य तत्रैव पर्यवसानान्न्यायवैशेषिकयोरपि तथैव। नीयते प्राप्यते विवक्षितार्थसिद्धिर्न्यायः। अथ च विशेषपदार्थमधिकृत्य प्रवर्त्तमानं चिन्तनं वैशेषिकत्वेन प्रथितम्। अस्मिन् लघुप्रबन्धे तावन्मोक्षपदं विविच्य न्यायवैशेषिकदर्शनाभिमतमोक्षतत्त्वमादाय तत्कारणं स्वरूपञ्च विविच्यते। तत्राऽऽदौ पूर्वकार्यसमीक्षणादिकं वितन्यते।

## समस्याकथनम्

यद्यपि सामान्यतो न्यायवैशेषिकदर्शनदृष्टचा मोक्षविषयकं समीक्षणं बहुधा बहुभिर्विद्वद्भिः कृतं लभ्यते, अथापि न्यायवैशेषिकदर्शनदृष्टचा मोक्षतत्त्वपरिशीलनक्रमे ऐतिहासिकरूपेणाऽऽचार्याणां मतभेदविषयकं समीक्षणं वस्तुगत्या तत्तात्पर्यञ्च न परिशीलितं दृश्यते। अतोऽस्मिन् विषये एताः समस्या मूलभूता वर्त्तन्ते-

(क) मोक्षतत्त्वं किम् ?

(ख) न्यायवैशेषिकदृष्ट्या मोक्षतत्त्वस्य तोलनात्मकतया ऐतिहासिकं चिन्तनं कथं प्रवृत्तम् ?

(ग) तच्चिन्तने किञ्च साम्यं किं वा वैषम्यम् ?

## उद्देश्यकथनम्

न्यायदर्शनदृष्टचा मोक्षतत्त्वमादाय समीक्षणं वस्तुतत्त्वविवेचनञ्च विधाय तत्तात्पर्यप्रकाशनपूर्वकं निष्कर्षणमेव प्रस्तुतस्य शोधलेखस्योद्देश्यं वर्त्तते। तथा च मूलभूतमुद्देश्यमिदं वर्त्तते-

(क) मोक्षतत्त्वस्य स्वरूपप्रतिपादनम्।

(ख) न्यायवैशेषिकदृष्ट्या मोक्षतत्त्वस्य तोलनात्मकतया ऐतिहासिकचिन्तनप्रवृत्तिविश्लेषणम्।

(ग) तच्चिन्तने ऐतिहासिकतयाचार्याणां साम्यवैषम्योद्घाटनञ्च।

## पूर्वकार्यसमीक्षणम्

पौरस्त्यदर्शने न्यायवैशेषिकयोर्विशिष्टं स्थानं विद्यते। प्रायः सर्वस्यापि पौरस्त्यचिन्तनस्य मोक्षे पर्यवसानान्न्यायवैशेषिकयोरपि तथैव स्वाभाविकम्। न्यायवैशेषिकदर्शने आदृत्य मोक्षविषयकं चिन्तनं तत्र तत्र ग्रन्थेषु कृतं लभ्यते। तथा सत्यपि मोक्षतत्त्वमादाय समग्रतयैकीकृत्य तत्तन्मतानामाकरमन्विष्य च न तथा विमृष्टिर्लभ्यते यथाऽपेक्ष्यते। न जातेऽपि पृथक्त्वेन समग्रतयाऽऽकरस्थप्रसङ्गमन्विष्य मोक्षविषयके विमर्शने, तद्विषयकं चिन्तनं किञ्चन लभ्यत एव। तदेवाऽत्र थालीपुलाकन्यायेन कालक्रमानुसारेण प्रस्तूयते-

आनन्दझामहोदयेन *पदार्थशास्त्र* (१९६५) इत्याख्ये ग्रन्थे न्यायवैशेषिकदर्शनसम्बद्धं मोक्षविषयकं चिन्तनं विहितं वर्त्तते। तत्क्रमे तत्रभवता झामहाभागेन विशेषतो वैशेषिकीं दृष्टिमादाय मोक्षचिन्तने प्रस्तुतेऽपि न्यायवैशेषिकयोस्तौलनिकसमीक्षणं कृतं नास्ति, अथ च न्यायचिन्तने मोक्षावस्था कीदृशी इत्यस्मिँश्च विषये वस्तुतस्तु सम्यग् व्यालोडितं नास्ति।

महामहोपाध्यायफणिभूषणतर्कवागीशमहोदयेन *न्याय-परिचय* १९६८) इति नामके न्यायदर्शनपरिचयात्मके ग्रन्थे न्यायदर्शनाऽभिमतं मोक्षतत्त्वं किञ्चन विवृतं लभ्यते। परन्त्वत्र फणिभूषणमहाभागेन समग्रतया विश्लेषणं न कृतमिति।

नारायणमिश्रमहोदयेन *वैशेषिकदर्शन* : एक अध्ययन (१९६८) इत्याख्ये वैशेषिकदर्शनविश्लेषणात्मके ग्रन्थे वैशेषिकदर्शनाभिमते मोक्षविषये उक्तं वर्त्तते यद् वैशेषिकचिन्तने द्रव्यादीनां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञाने जाते सति मुक्तिर्लभ्यते । मुक्तौ च न सुखं न वा दुःखमिति । तत्रभवान् मिश्रमहाभागो वैशेषिकीं दृष्टिमादाय मोक्षविषयकं चिन्तनं सुष्ठु प्रस्तुतवानस्ति, अथापि न्यायगतां दृष्टिमादाय तुष्णीमास्ते ।

काशिकानन्दगिरिमहाभागेन *द्वादशदर्शनसङ्ग्रहः* (१९८८) इत्याख्ये ग्रन्थे न्यायदर्शनदृष्टचाऽथ च वैशेषिकदर्शनदृष्ट्या मोक्षविषयकं सामान्यविवेचनं कृतं लभ्यते । तत्र मोक्षविषयके चिन्तने प्रस्तुतेऽपि ऐतिहासिकतया विश्लेषणं कृत्वा न निष्कर्षणं दत्तं लभ्यते ।

डा.किशोरदासशास्त्रिमहाभागेन *भारतीय दर्शन और मुक्ति-मीमांसा* (वै.२०५५) इत्याख्ये ग्रन्थेऽखिलमपि पौरस्त्यचिन्तनमादाय मुक्तिर्व्यालोडिता । तत्क्रमे तत्रभवता शास्त्रिमहाभागेन न्यायवैशेषिकदृष्टिञ्च पुरस्कृत्य मुक्तिविषयकं विश्लेषणं कृतं लभ्यते । अथापि तत्र मुक्तौ न्यायवैशेषिकदृष्टिमादाय मुक्तावस्थायां सुखं भवति न वेति विषये आन्तं व्यालोडनं न कृतमस्ति ।

डा.वैकुण्ठघिमिरेमहाभागेन *वात्स्यायनप्रशस्तपादभाष्ययोस्तुलनात्मकमध्ययनम्* (वै.२०६७) इत्याख्ये विद्यावारिधिशोधप्रबन्धे मोक्षविषयकं चिन्तनं विहितमस्ति । तत्र तावद् विशेषतो न्यायदर्शनदृष्टचा मोक्षविषयकं चिन्तनं प्रस्तुतं लभ्यते । परं दर्शनद्वयमादाय तदभिमतस्य मोक्षतत्त्वस्याऽऽन्तं विश्लेषण कृतं न लभ्यते ।

डा.सीतारामखतिवडामहाभागेन *न्यायबौद्धदर्शनाभिमता-पवर्गनिर्वाणयोस्तुलनात्मकसमीक्षणम्* (वै.२०७८) इत्याख्ये विद्यावारिधिशोधप्रबन्धे न्यायदर्शनदृष्ट्या बौद्धदर्शनदृष्ट्या च मोक्षविषयकं चिन्तनं विहितं वर्त्तते । परमत्रापि वैशेषिकयोर्दर्शनाभिमतस्य मोक्षस्याऽऽन्तं विश्लेषणन्तु कृतं नास्ति ।

एतावता तत्राऽनेकैर्विद्वद्भिः साक्षात् परम्परया वा न्यायवैशेषिकदर्शनाऽभिमतमोक्षविषयकाणि कानिचन चिन्तनानि विश्लेषणानि वा व्यक्तीकृतानीति स्पष्टीभवति । तथा सत्यप्युपर्युक्तानां चिन्तनानां सामान्यप्रसङ्गतया जृम्भितत्वादनुसन्धानदृशाऽपर्याप्तत्वं निर्बलत्वञ्च । किञ्च तथा कृतानि तानि चिन्तनानि तद्विषयिणीमैतिहासिकीं स्थितिमादाय नैव प्रवृत्तानि । अथ च तत्र तत्र ग्रन्थेषु यदपि विश्लेषणं विहितं तेन विश्लेषणेनाऽभीष्टाऽसिद्धेरत्र सम्पादिते च शोधलेखे न्यायवैशेषिकदर्शनगतं मोक्षसम्बद्धं विचारमादृत्य मोक्षविषयिणी मीमांसा प्रस्तुता वर्त्तते ।

## अध्ययनस्यौचित्यम्

प्रस्तुते लघुनिबन्धे न्यायदर्शनदृष्टिं पुरस्कृत्याऽथ च वैशेषिकचिन्तनधाराञ्चाऽवलम्ब्य मोक्षतत्त्वविषयकः समीक्षणात्मको विमर्शो विहितो वर्त्तते । अतश्च न्यायवैशेषिकदर्शनपुरस्सरं मोक्षतत्त्वमादायाऽग्रेऽनुसन्धानायाऽध्ययनायाऽध्यापनाय च प्रस्तुतस्य लघुप्रबन्धस्य साहाय यं भजमानत्वादस्यौचिती सिद्धचतीत्यत्र नास्ति काचिद् विप्रतिपत्तिः ।

## अध्ययनस्य सीमाङ्कनम्

न्यायवैशेषिकदर्शनसम्बद्धं मोक्षतत्त्वविमर्शनमेव प्रस्तुतस्याऽऽलेखस्य क्षेत्रं सीमा च वर्त्तते ।

## शोधविधिः

प्रस्तुतमिमं लघुप्रबन्धं सम्पादयितुमत्र सामग्रीसङ्कलनविधिरध्ययनविश्लेषणविधिश्चेति शोधविधिर्द्विधा विभक्तः । प्रसङ्गेऽत्रादावावश्यकसामग्रीसङ्कलनं कथं विहितमिति निर्दिश्यते चेत्तदनु सङ्कलितसामङ्ग्रीरादाय कतमञ्च विधिमवलम्ब्याऽऽलेखोऽयं सम्पादित इति स्पष्टीक्रियते । तत्र सम्पादितस्य लघुप्रबन्धस्य कृत आवश्यकसामग्रीणां सङ्

कलनार्थं भूरिशः पुस्तकालयाः प्रयुक्ताः । तत्र पुस्तकालयेषु प्राप्ता ग्रन्था एव प्रमुखसामग्रीत्वेन गृहीता इति । एवमेव यथावश्यकं न्यायवैशेषिकचिन्तनविचक्षणैः सह संवादादिकमपि विधाय सामग्रीसङ्कलनं कृतमस्ति ।

एवमेव प्रस्तुते लघुनिबन्धे मूलतः समीक्षणात्मको विधिरवलम्बितो वर्त्तते । अस्मिँश्च निबन्धे शास्त्रनिर्दिष्टान् सिद्धान्ताँश्चाऽऽदाय तेषां विषयाणां विश्लेष्यत्वान्निगमनात्मकविधिरवलम्बित इति सुतरां सिद्ध्यति । अभिधानेनाऽनेन लघुप्रबन्धेऽत्र गुणात्मकविधिरवलम्बित इत्यप्यभ्युपगमसिद्धान्तसिद्धम् ।

**मोक्षपदार्थः**

सर्वोऽपि मानवः सद्रखमिच्छतीत्यत्र नास्ति काचिद् विप्रपत्तिपत्तिः । तत्र सुखन्तावत् न सामान्यमपितु निरतिशयम् । यच्च पौरस्त्यचिन्तने मोक्ष-अपवर्ग-मुक्ति-निर्व्वाणादिभिः पदैर्व्यवह्रियते–

**मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम् ।**

**मोक्षोऽपवर्गः ... ॥** (अमरसिंहः, वै.२०७७, १।५।६,७) ।

तत्राऽनेकेषु शब्देषु प्रयुक्तेषु सत्स्वपि बहुशो बहुधा मोक्षशब्दः प्रयुज्यमानो लभ्यते । मोक्षश्च चौरादिकान्मोक्ष मोचने इत्यस्माद्धातोः भावे (अष्टा. ३।३।१८) इत्यनेन सूत्रेण घञि निष्पद्यते । स च चिन्तनभेदेन दर्शनभेदेन वा नैकास्ववस्थासु प्रयुज्यमानो लभ्यते । एतन्नाम कैश्चिद् विद्वद्भिर्दुःखाभावरूप एव मोक्ष इति प्रतिपादितं लभ्यते चेद् बहुभिस्तु सत्त्वेऽपि दुःखाभावस्य सुखरूप एव मोक्ष इत्यातस्थिरे । तत्र दुःखस्याभावस्त्वपेक्षित एव । एतन्नाम मोक्षावस्थायां निरतिशयसुखानन्दादिकमिति तेषां हृदयम्, सुखाभावे तदर्थमप्रवृत्त्यापत्तेः ।

**न्यायवैशेषिकदृशा मोक्षस्वरूपम्**

न्यायसूत्रे प्रमेयत्वेन मोक्ष उद्दिष्टो वर्त्तते- "आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्" (गौतमः, १।१।९) । तेन चाधिगन्तव्यो मोक्षः प्रमात्रा ज्ञेयोऽपि भवतीति सिद्ध्यति । ज्ञानाभावेऽधिगमप्रवृत्तेरसत्त्वादिति । तत्र मुनिना गौतमेन दुःखस्याऽत्यन्ताभाव एवाऽपवर्ग इत्युक्तं लभ्यते- "तदत्यन्तविमोक्षोऽपवर्गः" (गौतमः, १।१।२२) । तद्व्याख्यानप्रसङ्गे भाष्यकारेण वात्स्यायनेन तेन दुःखेन जन्मनाऽत्यन्तं विमुक्तिरपवर्गः इत्युक्तं लभ्यते । तत्रैव वार्त्तिककारेणोद्द्योतकरेण पुनः तेन शरीरादिना दुःखान्तेनाऽऽत्यन्तिको वियोग इत्यभाणि । वाचस्पतिमिश्रस्तु तेन दुःखेन .... इत्यादिकं भाषमाणो वास्त्यायनवाक्यमेवानुमोदते । एतावता दुःखवियोग एवाऽपवर्ग इति फलितार्थः । अत्र दुःखपदेन दुःखस्य कारणरूपं दुःखमप्यादाय शरीरम्, षडिन्द्रियाणि, तद्विषयाः, षड्विधानि ज्ञानानि, सुखं दुःखञ्चेति एकविंशतिविधं दुःखं गृहीतं वर्त्तते- "शरीरं, षडिन्द्रियाणि, षड् विषयाः, षड्बुद्धयः, सुखं दुःखञ्चेति" (उद्योतकरः, १।१।१) । तत्र शरीरं भोगाश्रयत्वाद्, इन्द्रियं विषया बुद्धयश्च पुनः दुःखकारणत्वेनाऽथ चाऽस्माभिरनुभूयमानं जागतिकं सुखं दुःखसम्पृक्तत्वाद् दुःखन्तु स्वरूपतो दुःखमिति ज्ञेयम्- "दुःखायतनत्वाद् दुःखम् । इन्द्रियाणि विषया बुद्धयश्च तत्साधनभावात् । सुखञ्च दुःखानुषङ्गात् । दुःखं स्वरूपत इति" (उद्योतकरः, १।१।१) ।

अपवर्गे च वर्त्तमानस्य जन्मनो हानमन्यस्य चाऽनुपादानं भवति- "उपात्तस्य जन्मनो हानमन्यस्य चाऽनुपादानम्" (वात्स्यायनः, १।१।२२) । अत्र सूत्रगतं 'तत्' पदं तृतीयान्तम् । तृतीयान्तं नाम विग्रहे तृतीया विभक्तिरिति । तावता च तेन दुःखेनाऽत्यन्तविमोक्षोऽपवर्ग इत्यर्थः । तत्र मुख्यदुःखमात्रं न ग्राह्यमपितु तत्कारणीभूतं शरीरादिकमप्यादेयमिति तूक्तपूर्वमेव । तत्र सूत्रगतेन दद्रःखपदेन मद्रख्यमेव दद्रःखं न गृह्येत इति धिया भाष्यकारेण दुःखेन जन्मना इति पदं योजितमिति सर्वतन्त्रस्वतन्त्रो वाचस्पतिमिश्रः स्पष्टीचकार- "...तेन दुःखेन मुख्यमेव दुःखमिति भ्रमो माभूदत आह- जन्मनेति । अनेन जायमाना दुःखशब्देन सर्वे शरीरादय उच्यन्ते" (मिश्रः, १।१।२२) । एतावता सूत्रार्थोऽयं स्फुटीभवति- एकविंशतिविधानां दुःखानामत्यन्ताभाव एव मुक्तिः । तदनन्तरं गृहीतं जन्म नश्यति

चेत् पुनर्जनिर्न जायते ।

ननु ऋणानुबन्धाज्जायमानो ह वै ब्राह्मणस्त्रिभिर्ऋणैर्ऋणवान् जायते- ब्रह्मचर्येण ऋषिभ्यः, यज्ञेन देवेभ्यः, प्रजया पितृभ्य इति श्रुतिसिद्धात् क्लेशानुबन्धाज्जननमरणादिनिमित्तात् प्रवृत्त्यनुबन्धाद् वा नापवर्गः- "ऋणक्लेशप्रवृत्त्यनुबन्धादपवर्गाभावः" (गौतमः, ४।१।५९) इति चेन्न, वस्तुतस्तु नात्र ऋणशब्दः प्रधानीभूतः । यत्र खल्वेकः प्रत्यादेयं ददाति, इतरः प्रतिदेयं गृह्णाति तत्रायं ऋणशब्दः प्रधानो भवति । अन्यत्र भाक्तः । अत्र च भाक्तः प्रयोगः। अतस्तावन्न मुक्तिरसम्भवा- "प्रधानशब्दानुपपत्तेर्गुणशब्देनानुवादो निन्दाप्रशंसोपपत्तेः" (गौतमः, ४।१।६०)। क्लेशानां सदा प्रवृत्तिसत्त्वान्मुक्तिरसम्भवेत्यपि न वाच्यम्, यथा सुषुप्तस्य स्वप्नादर्शने क्लेशानुबन्धो विच्छिद्यते तथैव मुक्तस्य क्लेशविच्छेदस्य सम्भवात्- "सुषुप्तस्य स्वप्नादर्शने क्लेशाभावादपवर्गः" (गौतमः, ४।१।६३) । किञ्च रागद्वेषमोहलक्षणेषु क्लेशेषु प्रक्षीणेषु प्रवृत्तेरभावात् सा न मुक्तिबाधिकेति- "न प्रवृत्तिः प्रतिसन्धानाय हीनक्लेशस्य" (गौतमः, ४।१।६४)। एतावता मुक्तिः सम्भवा । सा च प्रमाणादितत्त्वज्ञानादिति न्यायहृदयम् ।

वैशेषिकचिन्तने न खलु न्यायशास्त्रे इव उद्देशप्रकरणे मोक्ष उद्दिष्टः । अथापि कर्म्मविश्लेषणक्रमे मोक्षविषयकः प्रसङ्गो जृम्भितोऽस्ति । तत्र पञ्चमाध्यायस्य द्वितीयाह्निके कर्म्मविश्लेषणक्रमे मनोगतकर्मविषयकं चिन्तनमपि विततं लभ्यते । तत्र तावच्छरीरधारकमनःकर्मणोऽभावे आत्मनो वर्त्तमानशरीरसंयोगो नश्यति चेन्नवीनशरीरसंयोगस्याप्यभावो जायते, एतन्नाम जनिर्न जायते। जन्माभावो नाम जागतिकसुखदुःखाभावः, स एव मोक्षः- "तदभावे संयोगाभावोऽप्रादुर्भावश्च मोक्षः" (कणादः, ५।२।१८) । प्रसङ्गेऽत्राऽस्यैव सूत्रस्याऽऽकूतं भाषमाणस्य प्रशस्तदेवस्य वचनरचनमिदं गाढं चिन्तनीयम्-

> **ज्ञानपूर्वकात्तु कृतादसङ्कल्पितफलाद् विशुद्धे कुले जातस्य दुःखविगमोपाय-जिज्ञासोराचार्यमुपसङ्गम्योत्पन्नषट्पदार्थतत्त्वज्ञानस्याज्ञाननिवृत्तौ विरक्तस्य रागद्वेषाद्यभावात् तज्जयोर्धर्माधर्मयोरनुत्पत्तौ पूर्वसञ्चितयोश्चोपभोगान्निरोधे सन्तोषसुखं शरीरपरिच्छेदं चोत्पाद्य रागादिनिवृत्तौ निवृत्तिलक्षणः केवलो धर्मः परमार्थदर्शनजं सुखं कृत्वा निवर्त्तते । तदा निरोधाद् निर्बीजस्याऽऽत्मनः शरीरादिनिवृत्तिः । पुनः शरीराद्यनुत्पत्तौ दग्धेन्धनानलवदुपशमो मोक्ष इति** (प्रशस्तपादः, १९९७, पृ.६८२) ।

एतदेव स्पष्टीकुर्वन् शङ्करमिश्रो व्याचष्टे- "योगबलेनात्मतत्त्वसाक्षात्कारे सति तेन च सवासनमिथ्याज्ञाने ध्वस्ते तन्निबन्धनानां रागद्वेषमोहानां दोषाणामपायात् प्रवृत्तेरपाये तन्निबन्धनस्य जन्मनोऽपाये तन्निबन्धनस्य दुःखस्यापाय इति तावद्वस्तुगतिः" (मिश्रः, ५।२।१८) । एतदेव विवृण्वान उदयनाचार्यो नितरामनिष्टनिवृत्तिरेव मुक्तिरित्याह- "तस्मादनिष्टनिवृत्तिरात्यन्तिकी निःश्रेयसम्" (उदयनाचार्यः, सन् १९८०, पृ.८२) ।

उपरिष्टाद् व्याख्यानबलेन किं ज्ञायत इति चेन्न्यायसूत्रे मुक्तेरसत्त्वपक्षं पुरःस्थाप्य तत्खण्डनविषयिणी मीमांसा कृता लभ्यते, परं वैशेषिकचिन्तने तु तथा न लभ्यते । अथ च तत्त्वज्ञाने सति सद्य एव मुक्तिर्जायते कालान्तरे वेत्यत्र न्यायसूत्रे दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानेषूत्तरोत्तरविनाशे पूर्वपूर्वनाशान्मुक्तिरिति क्रमो निर्दिष्टो लभ्यते- "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः" (गौतमः, १।१।२) । परं वैशेषिकसूत्रे तथा क्रमविषयकं चिन्तनन्तु न लभ्यते ।

### न्यायवैशेषिकदर्शनदृशा मोक्षकारणम्

न्यायदर्शने प्रमाणादिषोडशपदार्थानां तत्त्वज्ञाने सति मुक्तिरिति नाऽविदितं विदुषाम्- "प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्तावयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः" (गौतमः, १।१।१) । एवमेव वैशेषिके च द्रव्यादीनां षण्णां पदार्थानां साधर्म्यवैधर्म्याभ्यां

तत्त्वज्ञानान्निःश्रेयसम् इति स्पष्टीकृतं वर्त्तते- ''धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्'' (कणादः, १।१।४)। तत्त्वज्ञानपदे कर्मणि षष्ठीति भाष्यकारः स्पष्टीकरोति- ''तत्त्वस्य ज्ञानं निःश्रेयसस्याधिगम इति कर्म्मणि षष्ठ्यौ'' (वात्स्यायनः, १।१।१)। तत्त्वञ्च पुनः 'सतश्च सद्भावः, असतश्च असद्भावः' इति भाष्यकारो वात्स्यायनः। सतो घटपटादेः पदार्थजातस्य सत्त्वम् = विद्यमानत्वमेव तत्त्वम्। असतश्चाऽऽकाशकुसुमादेरसद्भावः = अविद्यमानत्वमेवेति। एतावता सद्वस्तुनोऽविपरीततया सदिति रूपेण ग्रहणमेव तत्त्वज्ञानञ्चेद् असद्वस्तुनश्चाऽविपरीततया असदिति रूपेण ग्रहणमेव तत्। तथा सद्विधाश्च पदार्थाः षोडशधा विभज्यन्ते न्यायशास्त्रे। वैशेषिके च सप्तधा। तेषामविपरीततया ज्ञानादेव मुक्तिरिति व्यवस्थापितं शास्त्रयोरनयोः। अनेन कथनेन तत्त्वज्ञानान्मुक्तिरिति तु स्पष्टमेव। परन्तु भेदः कः ? इति चेन्न्याये मुक्तौ मूलतस्तत्त्वज्ञानस्यैव मूलकारणत्वं प्रतिपाद्यते चेद् वैशेषिके तु ज्ञानकर्म्मसमुच्चयवाद उरीक्रियते। वैशेषिके ज्ञानकर्म्मसमुच्चयवाद उरीक्रियते इति तु व्योमशिवाचार्येणाऽथ च प्रशस्तपादभाष्यस्य व्याख्यात्रा न्यायकन्दलीकारेण श्रीधरभट्टेनाऽभिव्यक्ताभ्यां वाक्याक्यां स्पष्टीभवति- ''तच्चेश्वरचोदनाभिव्यक्ताद्धर्मादेवेति समुच्चीयमानावधारणमनिर्दिष्टप्रतिषेधार्थम्।...यस्य विशिष्टधर्मसद्भावस्तस्याल्पीयसा प्रयासेन तत्त्वज्ञानं सम्पद्यते'' (व्योमशिवाचार्यः,१९८३, पृ.१५)।...''तच्चेति चकारो द्रव्यादिसाधर्म्यज्ञानेन सह धर्म्मस्य निःश्रेयसहेतुत्वं समुच्चिनोति'' (प्रशस्तपादः, १९९७, पृ.१९)। द्वयोर्विदुषोर्भेदः कुत्र इति चेद् व्योमशिवाचार्यो ज्ञानस्य प्रामुख्यं मन्यमानस्तदभिन्नसहयोगित्वेन धर्मं किंवा वैदिककर्म्म परिगणयति। भट्टश्रीधरश्च धर्म्मस्य किंवा वैदिककर्म्मणः प्रामुख्यं स्वीकुर्वाणस्तदभिन्नसयोगित्वेन द्रव्यादितत्त्वज्ञानं पुरःस्थापयति। ननूदयनाचार्यस्तु न तथा व्याचष्टे, अपितु ज्ञानस्यैव मुक्तेः कारणत्वं स्पष्टीकरोति। स च ज्ञानकर्म्मसमुच्चयवादं निराकुर्वन्नाह- ''एतेन सत्त्वशुद्धिद्वारेण आरादुपकारकं कर्म्म सन्निपत्योपकारकञ्च तत्त्वज्ञानमिति मन्तव्यम्। न तु तुल्यकक्षतया तत्समुच्चयः'' (उदयनाचार्यः, सन् १९८०, पृ.१०६)। नैयायिकत्वेन प्रथितयशस्त्वेऽप्युदयनाचार्यस्तावद् वैशेषिकत्वेन तथोक्तमिति चेत् सत्यम्, परं तत्सर्वं न्यायप्रभावादित्यवधेयम्। एतन्नामोदयनस्तावन्न्यायप्रभावादेव ज्ञानकर्म्मसमुच्चयवादं निराकरोति। अतो न्यायप्रभावरहितानां समेषाञ्च शुद्धवैशेषिकाणान्तु ज्ञानकर्म्मसमुच्चयवाद एवाऽभिमतः, तत्प्रभाववशाद् वदतान्तु पृथक् कथा। वैशेषिकसूत्रेऽभ्युदयस्य निःश्रेयसस्य च कारणत्वेन धर्मस्य निर्दिष्टत्वाद् अथ च धर्मविशेषप्रसूतस्य द्रव्यादीनां तत्त्वज्ञानस्य च निःश्रेयसकारणत्वेन निर्देशाच्च कणादेन ज्ञानकर्म्मसमुच्चयवादः पुरःस्थाप्यत इति स्पष्टीभवति।

प्रसङ्गोऽत्रेदञ्चाऽवधेयम्- वस्तुतस्तु पौरस्त्यचिन्तने बन्धस्याऽथ च मोक्षस्य कारणं मन एव। मनो विषयासक्तं सद् बन्धकारणं जायते, निर्विषयकं मनो मोक्षस्य कारणमिति पौरस्त्यचिन्तनहृदयम्। अतस्तावद् मुमुक्षुभिर्मनसो निर्विषयत्वमपेक्षितम्-

**मन एव मनुष्याणां कारणं बन्धमोक्षयोः।**
**बन्धाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतम्॥**
**यतो निर्विषस्यास्य मनसो मुक्तिरिष्यते।**
**तस्मान्निर्विषयं नित्यं मनः कार्यं मुमुक्षुणा॥** (ब्रह्मबिन्दूपनिषद्- २,३)

न्यायशास्त्रे दोषवशात् प्रवृत्तिर्जायते, प्रवृत्तिवशाच्च जन्म, जन्मतो दुःखं किंवा जन्म एव दुःखमित्यभिहितं लभ्यते। तत्र दोषाणां रागद्वेषमोहभेदेन त्रैराश्यं प्रतिपादितमस्ति- ''तत्त्रैराश्यं रागद्वेषमोहार्थान्तरभावात्'' (गौतमः, ४।१।३)। तत्र पुनः मोहस्य प्रामुख्यं किंवा पापीयस्त्वं प्रतिपादितमेव- ''तेषां मोहः पापीयान्नामूढस्येतरोत्पत्तेः'' (गौतमः, ४।१।६)। एतावता मोहादिषु सत्सु प्रवृत्तयो जायन्ते। मोहादीनाञ्च मनःसम्बद्धत्वात्, तेषां जनेन मनःकारणत्वाद् वा मन एव प्रवृत्तेः कारणत्वमित्युक्तं भवति, वैशेषिके चैतत्समर्थ्यते। एतावता न्यायवैशेषिकयोश्च मनसो बन्धकारणत्वे मोक्षहेतुत्वे

चाऽविप्रतिपत्तिरित्यवगम्यते । तत्र मनसोऽवस्थाभेदस्तु सुतरां सिद्ध्यति ।

मोक्षार्थं जीवः कथं प्रवर्त्तते ? कथञ्च मोक्षोऽधिगम्यते ? इत्यत्र वैशेषिकदृष्ट्यवगमार्थं प्रशस्तपादभाष्यस्य व्याख्यातुः श्रीधरस्य वाक्यपुरस्सरं विचारयामः- "विशुद्धे कुले जातस्य प्रत्यहं दुःखैरभिहन्यमानस्य दुःखविगमोपाये जिज्ञासा सम्पद्यते- 'कुतो नु खल्वयं मम दुःखोपरमः स्यात्' इति" प्रशस्तपादः, १९९८, पृ.६८१) । तथा जिज्ञासमानो जनः तत्वज्ञानिनः सान्निध्यमुपगच्छति । ततः तस्माद् गुरोर्द्रव्यादीनां षण्णां किंवा सप्तानां पदार्थानां श्रवणात्मकं परोक्षज्ञानं तस्य जायते । तदनु "आत्मा आत्मा वारे द्रष्टव्य..." (बृ.उ. २।४।५) इत्यादिविधिमनुसृत्य द्रव्यादिपदार्थानामपरोक्षं ज्ञानं जायते- "तस्य आचार्योपदेशात् षण्णां पदार्थानां श्रौतं तत्त्वज्ञानं जायते । तदनु श्रवणमनननिदिध्यासनादिक्रमेण प्रत्यक्षं भवति" प्रशस्तपादः, (१९९७, पृ.६८१) । तथापरोक्षज्ञानेन जगत्कारणीभूतं मिथ्याज्ञानं नश्यति, ततो विरज्यते । ततश्च रागद्वेषादयो नश्यन्ति । ततो न धर्माधर्मौ । प्राक्तनावपि उपभोगनाश्यौ । तस्य चोत्पन्नषट् पदार्थज्ञानेनस्याऽज्ञाननिवृत्तिर्भवति । कारणाभावेन कार्यस्यानुत्पत्तेस्तन्निवृत्तौ विरागः । विरक्तस्य रागद्वेषाभावात् ताभ्यां जायेते यौ धर्म्माधर्म्मौ तौ तज्जौ, तयोरनुत्पत्तिरिति । तयोरभावे प्रवृत्त्यभावः, प्रवृत्तेरभावे जन्माभावः । ततो दुःखाभावः।स एव मोक्ष इति- "यथा दग्धेन्धनस्यानलस्योपशमो ज्वालादिरहितस्यावस्थानम्, तद्वदत्यन्तं विशेषगुणविमुक्त-स्यात्मनोऽवस्थानं मोक्ष इति निर्णीतमादिवाक्ये" (व्योमशिवाचार्यः, १९८४, पृ.२३७) ।

## मोक्षे सुखं भवति न वा ?

न्यायशास्त्रे मुक्तावात्मनो जडत्वमिति प्रसिद्धम् । तन्नाम मुक्तावस्थायां जीवे न विशेषगुणा भवन्तीति । मोक्षप्रतिपादके "तदत्यन्तविमोक्षोऽपवर्गः" (गौतमः, १।१।२२) इत्याख्ये सूत्रे आगतेन तत्पदेन तत्पूर्ववर्त्ति दुःखं गृह्यते । दुःखञ्च प्रतिकूलवेदनीयम् । अथ च तत्र पुनः सांसारिकं सुखमपि गृह्यते, सांसारिकसुखस्य दुःखसम्पृक्त्या वस्तुगत्या दुःखत्वमेव । एतन्नामाऽत्र दुःखपदेन सुखमपि ग्राह्यमिति । अतो यथा विषसम्पृक्तमन्नमनादेयं तथैव दुःखसम्पृक्तस्य सुखस्याप्यनादेयत्वं सिद्धयति । किञ्च सांसारिकं सुखं न केवलं दुःखसम्पृक्तमेवाथ च दुःखमेव । दुःखत्वात् तत्सुखम् अनादेयम्- "यथा मधुविषसम्पृक्तान्नमनादेयमिति एवं सुखं दुःखानुषक्तमनादेयमिति" (वात्स्यायनः, १।१।२) ।

वस्तुतस्तु न्यायशास्त्रे यदपि चिन्तनं तत्सर्वं सांसारिकावस्थागतम् । अतो मुक्तौ जागतिकसुखानन्दादिकाभावस्तु सुतरां सिद्धयतीत्यत्र नास्ति काचिद् विप्रतिपत्तिः । वस्तुगत्या मुक्तावप्यात्मनि पारमार्थिकं ज्ञानसुखानन्दादिकं भवत्येव । परं सांसारिकस्याऽथ च व्यावहारिकस्यैतत्त्रितयस्याऽपि तत्रासत्त्वादथ च व्यवहारमनुसृत्य न्यायशास्त्रस्य प्रवृत्तत्वाद् गौतमेन तदभाव एव मोक्षे प्रतिपादितः । भाष्यकारेणाऽपि व्यवहारमेवाऽऽदाय तदवलम्बितं लभ्यते ।

न तावन्मात्रमपितु मुक्तो जीवोऽखिलैर्गुणैः रहित आत्मस्वरूपप्रतिष्ठानः सन् मोक्षावस्थायां बुभुक्षापिपासालोभमोहशैत्योष्णाख्याः षडूर्मीरतिक्रान्तो भवतीति भाषमाणो भट्टजयन्तोऽपि व्यावहारिकीं स्थितिमादृत्यैव स्वदृष्टिं प्रस्तौति-

**ननु तस्यावस्थायां कीदृगात्मावशिष्यते ।**
**स्वरूपैकप्रतिष्ठानः परित्यक्तोऽखिलैर्गुणैः ।**
**ऊर्मिषट्कातिगं रूपं तदस्याहुर्मनीषिणः ॥**
**संसारबन्धनाधीनदुःखक्लेशाद्यदूषितम् ।** (भट्टः, १९८४, पृ.२)

वस्तुगत्या तु न्यायशास्त्राभिमतमोक्षावस्थायां सुखानन्दादिकं भवतीत्येव सत्यम् । तत् कथं सिद्धयति ? इत्यत्र विचारयामः- कदाचन तीर्थमटमानं शङ्कराचार्यमेको नैयायिकः सगर्वं पृच्छति यद् भवान् यदि ज्ञाता चेत् काणादगौतमीयमुक्तिगता

भिद् वाच्यताम्, नो चेद् भवत्सर्वज्ञत्वं बहुज्ञत्वं वापगतं भवेद् इत्यत्र आचार्यः शङ्करो ब्रूते- काणादमते सर्वगुणोच्छेदो मुक्तिश्चेन्नैयायिकमते सानन्दसंविन्मुक्तिरिति। प्रसङ्गोऽयं माधवाचार्यः सङ्क्षेपशङ्करविजय इत्याख्ये ग्रन्थे स्पष्टीचकार इति सूचयति फणिभूषणतर्कवागीशः-

**तत्रापि नैयायिक आत्तगर्वः कणादपक्षाच्चरणाक्षपक्षे।**
**मुक्तेर्विशेषं वद सर्वविच्चेत् नो चेत् प्रतिज्ञां त्यज सर्ववित्त्वे॥**
**अत्यन्तनाशे गुणसङ्गतेर्या स्थितिर्नभोवत् कणभक्षपक्षे।**
**मुक्तिस्त्वदीये चरणाक्षपक्षे सानन्दसंवित्सहिता विमुक्तिः॥** (फणिभूषणः, १९६८, पृ.१४ इत्यत्रोद्धृतम्)

भासर्वज्ञकथनेनापि तत् पुष्यति- भासर्वज्ञस्तावद् अन्येषां नैयायिकानां मोक्षविषयकं विचारमादायाऽऽदौ "समस्तात्मविशेषगुणोच्छेदे संहारावस्थायामाका-शवदात्मनोऽत्यन्तावस्थानं मोक्षः" (भासर्वज्ञः,२००४, पृ.५९४) इत्युक्त्वा तत्र कारणत्वेन सुखदुःखयोरविनाभावित्वादिकं सन्दर्श्य ततस्तत्खण्डनपुरस्सरमागमान्मोक्षे सुखोपभोगसिद्धिर्जायत इत्याह-

**दुःखे सति सुखस्यासम्भवात्कण्टकादिपरिहारोऽपि सुखोपभोगार्थ एवेत्यसमो दृष्टान्तः।**
**कुतो मुक्तस्य सुखोपभोगसिद्धिरिति चेद्, आगमात्। उक्तञ्च-**
**'सुखमात्यन्तिकं यत्र बुद्धिग्राह्यमतीन्द्रियम्।**
**तं वै मोक्षं विजानीयाद् दुष्प्रापमकृतात्मभिः॥'इति॥**
**तथा 'आनन्दं ब्रह्मणो विद्वान्न बिभेति' (तै.उ.२।४) 'आनन्दं ब्रह्मणो रूपं**
**तच्च मोक्षेऽभिव्यज्यते', 'विज्ञानमानन्दं ब्रह्म' (बृ.उ. ३।९।३४) इति च।**
**मुख्यार्थे बाधकाभावान्नोपचारकल्पना। किञ्च भाराक्रान्तस्य तदपाये**
**वाय्वादिसम्पर्कवशात्सुखोत्पादे सत्येव सुखशब्दप्रयोगः, न दुःखाभावे** (भासर्वज्ञः, २००४, पृ.५९५)।

एवङ्क्रमे सर्वमतसङ्ग्रहकथनमथ च सर्वसिद्धान्तसङ्ग्रहकथनमपि स्मर्तव्यं भवति। तत्रेदं वचनं लभ्यते- "मोक्षस्तु न दुःखनिवृत्तिमात्रमपितु नित्यसुखस्याविर्भावोऽपि। तस्य जन्यत्वेऽपि निखिलदुःखप्रध्वंसरूपत्वादविनाशित्वं चोपपद्यते" (गणपतिः, १९१८, पृ.२७)। अनेन वचनेनापि वस्तुतस्तु न्यायमते मुक्तावस्थायां नित्यसुखमेव द्योत्यते। अत्र च पुनः पश्यामः सर्वसिद्धान्तसङ्ग्रहस्थताम् इमामभिव्यक्तिं भगवच्छङ्करपादीयाम्-

**तत्प्रसादाप्तयोगेन मुमुक्षुर्मोक्षमाप्नुयात्।**
**नित्यानन्दानुभूतिः स्यान्मोक्षे तु विषयादृते॥** (शङ्कराचार्यः, १९०९, पृ.२०३)

अत्र तावन्मुक्तिर्हीश्वरप्रसाद् गुरुकृपया च लभ्यत इत्यपि संसूचितं वर्तते। मुक्तौ च नित्यानन्दाभूतिर्भवतीति स्पष्टीकृतमेव।

किंबहुना तत्त्वचिन्तामणिदीधितौ मङ्गलाचरणे रघुनाथशिरोमणिः 'अखण्डानन्दबोधाय' इति लिलेख। तदर्थश्च अखण्डानन्दबोधार्थमिति। अखण्डानन्दबोधश्च कदा इति चेन्मुक्तौ। सांसारिकावस्थायां तदभावात्। मुक्तावपि तदस्वीकारे तत्पदव्यर्थत्वात्। एतावता दीधितिकारोऽपि मुक्तौ नित्यसुखानन्दपक्षपातीति सिद्ध्यति।

यद्यपि नाद्यत्वे उपलब्धेषु सूत्रभाष्यादिग्रन्थेषु तथा मतम्/विवरणं लभ्यतेऽथाप्युपर्युक्तैः कथनैः पुरा कस्मिँश्चन न्यायसम्प्रदाये मुक्तावस्थायां पारमार्थिकानन्दसंविदादिकं मन्यते स्मेति पुष्यतीत्येवं विचारमभिव्यनक्ति पण्डितप्रवरः फणिभूषणतर्कवागीशः (न्यायपरिचय, पृ.१४)। वस्तुतोऽनेन वचनरचनेन न्यायशास्त्रेऽपि मुक्तौ पारमार्थिकसुखादिकस्वीकारो द्योत्यते। अपि च मुक्तौ योऽपि सुखाद्यभाव उक्तः, तदुक्तिश्च जागतिकसुखादिकमादाय

इति वस्तुतत्त्वञ्च ध्वन्यते ।

न्यायभाष्ये मुक्तौ नित्यसुखाभिव्यक्तेः खण्डनं लभ्यते । तच्च खण्डनं प्राचीननैयायिकसम्प्रदायेनाभिमतस्य मुक्तौ नित्यसुखस्येति उदयनाचार्यकृतायाः किरणावल्या व्याख्याता गौरीनाथशास्त्री स्पष्टीकरोति (उदयनाचार्यः, १९८०, पृ.७४) ।

अत्रेदं गाढं चिन्तनीयम्- वस्तुगत्याऽऽत्मा ज्ञानरूप एव- ज्ञानस्वरूप एव । आत्मनि द्विविधं ज्ञानं भवति- स्वरूपात्मकं गुणभूतात्मकञ्च । एतदेवाद्वैते व्यवहारकाले, अथ च विशिष्टाद्वैते द्वैताद्वैते च सर्वदा स्वीक्रियते । गुणभूतं ज्ञानञ्च पुनर्द्विविधम्- जागतिकं पारमार्थिकञ्च । सुखादिकञ्च वस्तुतस्तथैव । तत्र न्यायशास्त्रे सांसारिकस्य गुणभूतज्ञानादेर्निरोधः । तन्निरोधे मुक्तौ तदभावः सुकर एव । न तु पारमार्थिकसुखाद्यभावः । "... तद् अभयमजरममृत्युपदं ब्रह्म क्षेमप्राप्तिरिति" (वात्स्यायनः, १।१।२२) इत्यादि वात्स्यायनवचनेनापि तत्र पारमार्थिकसुखन्तु भवत्येव इति सिद्ध्यति । अत्राभयपदेन संसारभयाभावो द्योत्यते । अथ च ब्रह्मणो नामरूपप्रपञ्चात्मना परिणामवादिनां ब्रह्माद्वैतिनां मतनिराकरणार्थम् अजरपदं प्रयुक्तम् । अथ च विनाशवादिनां बौद्धानां मतनिराकरणार्थम् अमृत्युपदमादत्तम् । ते हि प्रदीपस्यैव निर्वातं मोक्ष इति वदन्ति । तच्च नाशरूप एव-

> **अभयमिति पुनः संसारभयाभावमाह । अभयञ्च ब्रह्मेति असकृदभयश्रुतेः । ये तु ब्रह्मैव नामरूपप्रपञ्चात्मना परिणमत इत्याहुस्तान् प्रत्याह- अजरमिति । सर्वात्मना परिणाम एकदेशेन वा, पूर्वस्मिन् कल्पे सर्वात्मना ब्रह्मणो अन्यथात्वाद्विनाशप्रसङ्गः । एकदेशपरिणामे तु सावयवत्वेन घटादिवदनित्यत्वप्रसङ्ग इति सूक्तमजरमिति । वैनाशिकाः प्राहुः प्रदीपस्येव निर्वाणं मोक्षः तस्य चेतस इति, तान् प्रत्याह- अमृत्युपदमिति** (मिश्रः, १।१।२२) ।

अत्र 'क्षेमप्राप्तिः' इति पदेन वस्तुतः कल्याणप्राप्तिः, सुखप्राप्तिः, आनन्दप्राप्तिश्चेति द्योत्यन्ते । तथा कल्याणादिकञ्च पारमार्थिकम् । तावता च मुक्तौ पारमार्थिककल्याणादिप्राप्तिरिति सिद्ध्यति । तथा सत्यपि न्यायशास्त्रे सांसारिकसुखादीनामभावमादाय 'मुक्तौ सुखदुःखाद्यभावः' इत्युक्तम् । तत्र भाष्यकारेण यदपि सुखादीनां खण्डनं विहितम् । तत्तु पुनर्वेदान्तिभिः पारमार्थिकतया धर्मधर्मिभावं निराकृत्यात्मनो यज्ज्ञानमयत्वमानन्दमयत्वं स्वीक्रियते तन्निराकरणार्थम् । न तु वस्तुतो मुक्त्यवस्थायामनुभूयमानस्यानन्दादेः प्रत्याख्यानार्थमिति ।

इदमत्राकूतम्- वस्तुतस्तु न्यायाभिमतायां मुक्तौ ज्ञानसुखादिकं स्वीक्रियते न वेति केनचन पृष्टे सति नेत्येव वक्तव्यम् । अतोऽत्र लेखनव्यापारे मुक्तौ न्यायशास्त्रेऽपि ज्ञानसुखादिकमुरीक्रियते इति उच्यते चेत् सामान्यतः सिद्धान्तहानिरतो न्यायाभिमतमुक्तौ न ज्ञानसुखादिकमुरीक्रियतेऽपितु तदभाव एवेति वक्तव्यम् । पुनरत्र ध्येयं यदत्रास्माभिरुपरिष्टात् न्यायाभिमतमुक्तौ वस्तुतस्तु पारमार्थिकसुखं मन्यते इति प्रतिपादितम् अतो वदतोव्याघात इत्यप्याक्षिप्तुं शक्यते परमत्र गाढं चिन्तनीयं किमिति चेन्न्यायशास्त्रे जागतिकीं स्थितिमादृत्य विचारस्य प्रवृत्तत्वान्मुक्तौ जागतिकसुखस्य स्वीकारे तस्य दुःखसम्पृक्तत्वान्मुक्तावपि दुःखापत्तेर्जागतिकसुखस्यापि नावकाशः । तत उपरिष्टादस्य शास्त्रस्य चिन्तनक्षेत्रत्वाभावात् पारमार्थिकसुखं नात्र विचारगर्भितमतो मुक्तौ न सुखमिति । तावता च न्यायशास्त्रे सामान्येनैव मुक्तौ सुखाभाव इत्येव प्रसिद्धिर्जाता । वस्तुतस्तु जागतिकसुखाभाव इत्येव वस्तुतत्त्वम् ।

## निष्कर्षः

मोक्षपदं मोक्षणमित्यर्थे घञि चौरादिकान्मोक्षधातुतो निष्पद्यते । मोक्षो नाम निरतिशयदुःखनिवृत्तिः । न्यायवैशेषिकयोरपि निःश्रेयसे दुःखाभाव एव प्रतिपादितः । तत्र दुःखपदेन जागतिकसुखज्ञानादिकमपि ज्ञेयम् । तेषां दुःखसम्पृक्तत्वात् । एतावता न्यायवैशेषिकयोर्मोक्षावस्थायामात्मविशेषगुणानां नितरामभावः स्वीक्रियते ।

राद्धान्तोऽयं जागतिकसुखदुःखादिकमादाय, वस्तुतस्तु न्यायचिन्तने मुक्तौ सुखमेव मन्तव्यम्, प्रतिपाद्यते च तथैव भासर्वज्ञादिभिः । प्रसङ्गेऽस्मिन् यद्यपि वैशेषिकचिन्तनस्य स्थितिरपि तथैवगवगन्तव्या, परम् एतद्दर्शनेतिहासे स्पष्टतस्तथा वक्ता तु नास्मद्दृष्टिपथे आयातः ।

वैदिकचिन्तने 'ऋते ज्ञानान्न मुक्तिः' इत्याभाणकस्य प्रसिद्धत्वाज्ज्ञानस्यैव मोक्षकारणत्वं सिद्ध्यति । न्यायवैशेषिकशास्त्रयोरपि वैदिकचिन्तनत्वादथ च तत्रापि ...तत्त्वज्ञानान्निःश्रेयसाधिगम इत्यादेरुक्तत्वात् तत्त्वज्ञानस्यैव मुक्तिसाधनत्वं सुतरां सिद्धं भवति । यद्यपि वैदिकसंस्कृतौ मुक्तिसाधनत्वेन कर्मादिकन्तु प्रतिपादितं वर्तते एवाऽथापि तत्र मूलतस्तत्त्वज्ञानस्यैव मुक्तिहेतुत्वमिति तु सुज्ञातमस्ति । अत्रेदं गाढमवधेयं यत्तत्र सर्वैरपि चिन्तकैर्ज्ञानस्यैव निष्कण्टकेन किंवा निराधारत्वेन मुक्तिहेतुत्वं प्रतिपाद्यते इति न, अथापि कर्मणोऽपि मुक्तिहेतुत्वं प्रतिपापादितं लभ्यते तत्र तत्र शास्त्रेषु । यथा जैनचिन्तने मोक्षकारणत्रितये चारित्रमागच्छति, कर्म तदन्तर्भूतमेव । तावता कर्मणोऽपि मुक्तिहेतुत्वं निराबाधम् । अत्रेदं पुनर्ध्येयं यत् सामान्यतो न्यायशास्त्रे वैशेषिके च ज्ञानस्यैव मुक्तिहेतुत्वं प्रतिपाद्यते परं सूक्ष्मचिन्तनेन किं ज्ञायते इति चेन्न्यायदर्शने तत्त्वज्ञानस्यैव मुक्तिहेतुत्वं प्रतिपादितं वर्त्तते चेद् वैशेषिके तु ज्ञानकर्म्मसमुच्चयवादः पुरःस्थापितो लभ्यते ।

एतावता निष्कर्षे न्यायवैशेषिकयोः सिद्धान्ते आत्मनो नित्यत्वं सुखदुःखभुक्त्वञ्च प्रतिपाद्य तस्य मुक्तिविषयकं चिन्तनमपि सम्यग् वितन्यते । तच्च सहजमपेक्ष्यञ्च सर्वस्यापि शास्त्रचिन्तनस्य तत्रैव पर्यवसानात् । न्यायवैशेषिकयोः सांसारिकसुखदुःखादिकमादाय 'तदत्यन्तविमोक्ष एव मोक्षः' इति ।

## सन्दर्भसूची


अमरसिंहः, (२०७७), *अमरकोशः,* कुलचन्द्रगौतमकृतनेपालीभाषाटीकयुतः, द्वितीयं संस्करणम्, काठमाडौँ : नेपाल प्रज्ञा-प्रतिष्ठान ।

उदयनाचार्यः (सन् १९८०), *किरणावली,* गौरीनाथ (सम्पा.), वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय ।

उद्योतकरः, (सन् १९९७), *न्यायवार्त्तिकम्,* अनन्तलालठक्कुरेण संस्कृतम्, दिल्ली : भारतीयदार्शनिकानुसन्धानपरिषद् ।

कणादः, (सन् २००४), *वैशेषिकसूत्रम्,* षड्दर्शनसूत्रसङ्ग्रहे सङ्गृहीतम्, सम्पा.जे.एल.गुप्तः, वाराणसी : चौखम्बा संस्कृत प्रतिष्ठान ।

किशोरदासः, (सन् १९९८), *भारतीय दर्शन और मुक्ति मीमांसा,* राजपुर, स्वामी रामतीर्थ मिशन ।

खतिवडाः, सीतारामः (वै.२०७८), *न्यायबौद्धदर्शनाभिमतापवर्गनिर्वाणयोस्तुलनात्मकसमीक्षणम्,* अप्रकाशितो विद्यावारिधिशोधप्रबन्धः, दाङ : नेपालसंस्कृतविश्वविद्यालयः ।

गणपतिः (सम्पा.) (सन् १९१८), *सर्वमतसङ्ग्रह :,* जीर्णत्वान्न लब्धम्,राजकीयमुद्राणालयः ।

गिरिः, काशिकानन्दः (सन् २००१), *द्वादशदर्शनसङ्ग्रहः,* वाराणसी, श्री स्वामी काशिकानन्दजी ट्रस्ट ।

गौतमः, (सन् २००४), *न्यायसूत्रम्,* षड्दर्शनसूत्रसङ्ग्रहे सङ्गृहीतम्, सम्पा. जे.एल.गुप्तः, वाराणसी, चौखम्बा संस्कृत प्रतिष्ठान ।

घिमिरेः,वैकुण्ठः (सन् २०१०), *वात्स्यायनप्रशस्तपादभाष्ययोः* तुलनात्मकमध्ययनम्, अप्रकाशितो विद्यावारिधिशोधप्रबन्धः, वाराणसी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः ।

झा, आनन्द (सन् १९६५), *पदार्थशास्त्र,* लखनऊ, हिन्दी समिति सूचना विभाग ।

पाणिनि :, (सन् २०१९), *अष्टाध्यायी,* पदच्छेदवृत्तिवार्त्तिकटिप्पणीसहिता, वाराणसी, चौखम्बा सुरभारती प्रकाशन ।

प्रशस्तपादः, (सन् १९९७), *प्रशस्तपादभाष्यम्,* न्यायकन्दलीयुतम्, सम्पादकः, हिन्दीव्याख्याकारश्च- श्रीदुर्गानन्द झा,

वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय ।

फणिभूषण, (सन् १९६८), *न्यायपरिचय,* अनुवादक- डा.किशोरनाथ झा, वाराणसी, चौखम्बा विद्याभवन ।

भट्टः, जयन्तः, (सन् १९८४), *न्यायमञ्जरी,* ग्रन्थिभङ्गव्याख्यया संवलिता, व्याख्याता- चक्रधरः, तृतीयो भागः, ९-१२ आह्निकयुतः, वाराणसी, सम्पूर्णानन्द संस्कृत विश्वविद्यालय ।

भासर्वज्ञः, (सन् २००४), *न्यायसारः,* न्यायभूषणयुतः,सम्पा.स्वामी योगीन्द्रानन्दः, पुनर्मुद्रित संस्करण, वाराणसी : चौखम्बा विद्याभवन ।

मिश्रः, नारायणः (सन् १९६८), *वैशेषिकदर्शन* : एक अध्ययन,वाराणसी : चौखम्बा विद्याभवन ।

मिश्रः, वाचस्पतिः (सन् १९९०), *न्यायवार्त्तिकतात्पर्यटीका,* पुनर्मुद्रण, वाराणसी : चौखम्बा संस्कृत संस्थान ।

मिश्रः, शङ्करः (सन् २००७), *वैशेषिकसूत्रोपस्कारः,* ढुण्ढिराजशास्त्रिकृतया 'प्रकाशिका' हिन्दीव्याख्ययोपेतः, वाराणसी : चौखम्बा संस्कृत सीरिज आफिस ।

वात्स्यायनः, (सन् १९९८), *न्यायभाष्यम्,* प्रसन्नपदापरिभूषितम्, व्याख्याता सुदर्शनाचार्यः, अभिनवसंस्करणम्, वाराणसी : बौद्धभारती ।

व्योमशिवाचार्यः, (सन् १९८३), *व्योमवती,* प्रथमो भागः, वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय ।

... (सन् १९८४), *व्योमवती,* द्वितीयो भागः,वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय ।

शङ्कराचार्यः, (सन् १९०९), *सर्वसिद्धान्तसङ्ग्रहः,* रङ्गाचार्यकृताङ्लानुवादयुतः, मद्रासः जीर्णत्वान्न लब्धम् ।

शर्मा, वासुदेवः (सम्पा.), (सन् २००३), *बृहदारण्यकोपनिषद्,* ईशाद्यष्टोत्तरशतोपनिषदि सङ्गृहीता, दिल्ली : राष्ट्रियसंस्कृतसंस्थानम् ।

...(सन् २००३), *ब्रह्मबिन्दूपनिषद्,* ईशाद्यष्टोत्तरशतोपनिषदि सङ्गृहीता, दिल्लीः राष्ट्रियसंस्कृतसंस्थानम् ।